# ઋગ્વેદ શ્લોક

Selected verses from Rigveda

sanskritdocuments.org

September 29, 2018

# Selected verses from Rigveda

## ઋગ્વેદ શ્લોક

## Sanskrit Document Information

Text title : Rigveda shloka

File name : samplerig.itx

Category : veda, svara, rigveda

Location : doc_veda

Latest update : November 1, 2010

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 29, 2018

*sanskritdocuments.org*

# ઋગ્વેદ શ્લોક

Selected verses from Rigveda

૧૦૮૯૧૫૦૧૧ આ નો ભદ્રાઃ ક્રતવો યન્તુ વિશ્વતોऽદબ્ધાસો અપરીતાસ ઉદ્ભિદઃ ।
૧૦૮૯૧૫૦૧૨ દેવા નો યથા સદમિદ્ વૃધે અસન્નપ્રાયુવો રક્ષિતારો દિવે-દિવે ॥

૧૦૮૯૧૫૦૨૧ દેવાનાં ભદ્રા સુમતિરૃજૂયતાં દેવાનાં રાતિરભિ નોનિ વર્તતામ્ ।
૧૦૮૯૧૫૦૨૨ દેવાનાં સખ્યમુપ સેદિમા વયં દેવા ન આયુઃ પ્ર તિરન્તુ જીવસે ॥

૧૦૮૯૧૫૦૩૧ તાન્ પૂર્વયા નિવિદા હૂમહે વયં ભગં મિત્રમદિતિં દક્ષમસ્રિધમ્ ।
૧૦૮૯૧૫૦૩૨ અર્યમણં વરુણં સોમમશ્વિના સરસ્વતીનઃ સુભગા મયસ્ કરત્ ॥

૧૦૮૯૧૫૦૪૧ તન્ નો વાતો મયોભુ વાતુ ભેષજં તન્ માતા પૃથિવી તત્પિતા દ્યૌઃ ।
૧૦૮૯૧૫૦૪૨ તદ્ ગ્રાવાણઃ સોમસુતો મયોભુવસ્તદશ્વિના શૃણુતં ધિષ્ણ્યા યુવમ્ ॥

૧૦૮૯૧૫૦૫૧ તમીશાનં જગતસ્તસ્થુષસ્ પતિં ધિયંજિન્વમવસે હૂમહે વયમ્ ।
૧૦૮૯૧૫૦૫૨ પૂષા નો યથા વેદસામસદ્ વૃધે રક્ષિતા પાયુરદબ્ધઃ સ્વસ્તયે ॥

૧૦૮૯૧૬૦૬૧ સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પુષા વિશ્વવેદાઃ ।
૧૦૮૯૧૬૦૬૨ સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

૧૦૮૯૧૬૦૭૧ પૃષદશ્વા મરુતઃ પૃશ્નિમાતરઃ શુભંયાવાનો વિદથેષુજગ્મયઃ ।
૧૦૮૯૧૬૦૭૨ અગ્નિજિહ્વા મનવઃ સૂરચક્ષસો વિશ્વે નો દેવા અવસા ગમન્નિહ ॥

૧૦૮૯૧૬૦૮૧ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
૧૦૮૯૧૬૦૮૨ સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમદેવહિતં યદાયુઃ ॥

૧૦૮૯૧૬૦૯૧ શતમિન્ નુ શરદો અન્તિ દેવા યત્રા નશ્ચક્રા જરસં તનૂનામ્ ।
૧૦૮૯૧૬૦૯૨ પુત્રાસો યત્ર પિતરો ભવન્તિ મા નો મધ્યા રીરિષતાયુર્ગન્તોઃ ॥

૧૦૮૯૧૬૧૦૧ અદિતિર્દ્યૌરદિતિરન્તરિક્ષમદિતિર્માતા સ પિતા સ પુત્રઃ ।
૧૦૮૯૧૬૧૦૨ વિશ્વે દેવા અદિતિઃ પઞ્ચ જના અદિતિર્જાતમદિતિર્જનિત્વમ્ ॥

૧૦૯૦૧૭૦૧૧ ઋજુનીતી નો વરુણો મિત્રો નયતુ વિદ્વાન્ ।

૧૦૯૦૧૭૦૧૨ અર્યમા દેવૈઃ સજોષાઃ ॥

૧૦૯૦૧૭૦૨૧ તે હિ વસ્વો વસવાનાસ્તે અપ્રમૂરા મહોભિઃ ।
૧૦૯૦૧૭૦૨૨ વ્રતા રક્ષન્તે વિશ્વાહા ॥

૧૦૯૦૧૭૦૩૧ તે અસ્મભ્યં શર્મ યંસન્નમૃતા મર્ત્યેભ્યઃ ।
૧૦૯૦૧૭૦૩૨ બાધમાનાપ દ્વિષઃ ॥

૧૦૯૦૧૭૦૪૧ વિ નઃ પથઃ સુવિતાય ચિયન્ત્વિન્દ્રો મરુતઃ ।
૧૦૯૦૧૭૦૪૨ પૂષા ભગો વન્દ્યાસઃ ॥

૧૦૯૦૧૭૦૫૧ ઉત નો ધિયો ગોઅગ્રાઃ પૂષન્ વિષ્ણવેવયાવઃ ।
૧૦૯૦૧૭૦૫૨ કર્તા નઃ સ્વસ્તિમતઃ ॥

૧૦૯૦૧૮૦૬૧ મધુ વાતા ઋતાયતે મધુ ક્ષરન્તિ સિન્ધવઃ ।
૧૦૯૦૧૮૦૬૨ માધ્વીર્નઃ સન્ત્વોષધીઃ ॥

૧૦૯૦૧૮૦૭૧ મધુ નક્તમુતોષસો મધુમત્ પાર્થિવં રજઃ ।
૧૦૯૦૧૮૦૭૨ મધુ દ્યૌરસ્તુ નઃ પિતા ॥

૧૦૯૦૧૮૦૮૧ મધુમાન્ નો વનસ્પતિર્મધુમાનસ્તુ સૂર્યઃ ।
૧૦૯૦૧૮૦૮૨ માધ્વીર્ગાવો ભવન્તુ નઃ ॥

૧૦૯૦૧૮૦૯૧ શં નો મિત્રઃ શં વરુણઃ શં નો ભવત્વર્યમા ।
૧૦૯૦૧૮૦૯૨ શં ન ઇન્દ્રો બૃહસ્પતિઃ શં નો વિષ્ણુરુરુક્રમઃ ॥

Verses 1-89-15-1 through 1-90-18-9-

---

*Selected verses from Rigveda*

pdf was typeset on September 29, 2018

Please send corrections to *sanskrit@cheerful.com*